यहाँ से काटिए

Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 25

No. of Printed Pages – 7

VU–87–Sahit. Shas.

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

# वरिष्ठ उपाध्याय परीक्षा, 2017

## साहित्य – शास्त्रम्

**समय** : 3¼ **घण्टे**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

यहाँ से काटिए

1) मेघः कस्य प्रकृतिपुरूषः? [1]

2) अद्रेः श्रृंगं कः हरति? [1]

3) जह्नोः कन्या का आसीत्? [1]

4) दोषाश्रयाः के ? नामानि लिखत। [1 + 1 = 2]

5) श्रृंगाररसः कतिविधः? नामानि लिखत। [1 + 1 = 2]

6) शब्दवृत्तयः कति? नामानि लिखत। [1 + 1 = 2]

7) लक्षणायाः स्वरूपं किम्? [2]

8) ''कामार्ता हि प्रकृति कृपणाश्चेतना चेतनेषु'' इति सूक्तेः सप्रसङ्गो भावार्थो लेख्यः। [1 + 1 = 2]

9) याद–यति–लक्षणं लिखत। [1 + 1 = 2]

10) कयोश्चिद् द्वयोः लक्षणं सोदाहरणं विवेचयत । [1½+1½ = 3]

i) हेतुः

ii) कार्यम्

iii) निरूक्तम्

**11)** माधुर्यगुणं लक्षणोदाहरणपूर्वकं विवेचयत। **[1½+1½ = 3]**

अथवा

"रिपुं हत्वा यश: कृत्वा त्वदसि: कोशमाविशत्।" इत्यत्र को गुण: ? लक्षणोल्लेखपूर्वकं सङ्गतिर्विधेया।

**12)** कयोश्चिद् द्वयोरलङ्कारयो: लक्षणोदाहरणानि सङ्गतिपूर्वकं प्रदर्शनीयानि। **[1½+1½ = 3]**

i) विभावना

ii) दीपकम्

iii) रूपकम्

**13)** प्रस्तुतोदाहरणेषु द्वौ अलङ्कारौ परिचीय तयो: लक्षणोल्लेखपूर्वकं सङ्गतिर्विधेया। **[1½+1½ = 3]**

i) शैला इवोन्नता: सन्त: किन्तुप्रकृति कोमला:।

ii) अयमैन्द्री मुखं पश्य रक्तश्चुम्बति चन्द्रमा:।

iii) नमन्तमपि धीमन्तं न लङ्घयति कश्चन।

iv) यत्र स्यान्न पुन: शत्रोर्गर्जितं तर्ज्जितं जितम्।

**14)** विशेषणयोगाल्लक्षणाया: कतिभेदा:? नामानि विलिख्य सोदाहरणं विवेचयत। **[1 + 1 + 1 = 3]**

**15)** वक्तृस्यूतव्यङ्ग्यस्य भेदान् विवेचयत। **[3]**

**16)** अभिधावृत्तेः लक्षणं सभेदं सोदाहरणञ्च विवेचयत । **[3]**

**17)** केषाञ्चन चतुर्णां दोषाणां लक्षणोदाहरणानि सङ्गतिपूर्वकं विवेचयत। **[4 × 1 = 4]**

i) सन्दिग्धम्

ii) हतवृत्तम्

iii) श्रुतिकटुः

iv) अनुचितार्थः

v) शिथिलम्

vi) प्रतिकूलाक्षरम्

**18)** अधोलिखितालङ्कारयुग्मेषु द्वयोरलङ्कारयोः परस्परं भेदः लेखनीयः। **[2 + 2 = 4]**

i) समासोक्तिः – विशेषोक्तिः

ii) श्लेषः – यमकः

iii) निदर्शना – व्यतिरेकः

19) कयोश्चिद् द्वयोः रसयोः लक्षणोदाहरणे लिखत। [2 + 2 = 4]

i) रौद्ररसः

ii) करूणरसः

iii) अद्भुतरसः

20) गुणीभूतव्यङ्ग्यस्य स्वरूपं विलिख्य असुन्दरगुणीभूतव्यङ्ग्यं सोदाहरणं विवेचयत। [4]

21) सप्रसङ्ग – व्याख्या कार्या – [5]

''प्रतिभैव श्रृताभ्यास सहिता कवितां प्रति।

हेतुर्मृदम्बुसम्बद्धा बीजमाला लतामिव।।''

अथवा

चन्द्रालोकानुसारं काव्यस्य स्वरूपं विवेचयत।

22) निम्नलिखितयोः द्वयोरेकस्य श्लोकस्य छन्दोऽलङ्कार निर्देशपूर्वकं सप्रसङ्ग–व्याख्या कार्या। [½ + ½ + 1+ 3 = 5]

''तां चावश्यं दिवसगणना तत्परामेकपत्नीम्,

अव्यापन्नामविहतगति र्द्रक्ष्यसि भ्रातृजायाम्।

आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां,

सद्यः पाति प्रणयिहृदयं विप्रयोगे रूणद्धि।।''

अथवा

''गम्भीराया: पयसि सरितश्चेतसीव प्रसन्ने,

दायात्माऽपि प्रकृतिसुभगो लप्स्यते ते प्रवेशम्।

तस्मादस्या: कुमुदविशदान्यर्हसि त्वं न धैर्या–

न्मोधीकर्त्तुं चटुलशफ रोद्वर्तन प्रेक्षितामि।।''

23) ''महाकविकालिदासस्य मेघदूतम्'' इतिविवेचयत। [5]

24) सप्रसङ्गो भावार्थो लेख्य:– [1 + 4 = 5]

''सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियाया:,

सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।

गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां,

बाह्योद्यान स्थितहर शिरश्चन्द्रिकाधौतहर्म्या।।''

अथवा

''तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्त दृष्टि:,

जम्वू कुञ्ज प्रतिहतरयं तोयमादाय गच्छे:।

अन्त:सारं घन तुल यितुं नानिल: शक्ष्यति त्वां

रिक्त: सर्वो भवति हि लघु:पूर्णता गौरवाय।।''

25) क) कयोश्चिद् द्वयो : छन्दसोलक्षणोदाहरणे विलिख्य सङ्गतिरपि करणीया। [3 + 3 = 6]

i) हरिणप्लुता

ii) शालिनी

iii) रथोद्धता

ख) प्रस्तुतोदाहरणे गणनिर्देशपूर्वकं छन्दः परिचीय तल्लक्षणमपि विवेचनीयम्– [1 + 1 = 2]

''बलिमनोज्ञतटा तरणेः सुता।''

▽▽▽▽

DO NOT WRITE ANYTHING HERE